# संस्कृतवार्ता:

दिनाङ्क :-08.08.2024

प्रात: - 06:55

**अथ वार्ता:**

**लोकसभायां/वित्त विधेयक**

ह्य: लोकसभायां ऐषम: वित्त-विधेयकस्य चर्चायां वित्तमंत्री निर्मलासीतारामन: स्थापितप्रश्नस्य उत्तरं यच्छन्ती उक्तवती यत् विगत-दश-वर्षेषु प्रशासनेन पारदर्शकरूपेण कराधान-परिवर्तनानि कृतानि। ह्य: लोकसभायां चतुर्विंशत्यधिक द्विसहस्त्रतमवर्षस्य वित्तविधेयक: पारित:। सहैव प्रशासनस्य वित्तीयप्रस्तावा: प्रभाविण: अभवन्, आयव्ययपत्रकप्रक्रिया च सम्पन्ना। लोकसभायां विधेयकविषये चर्चाया: उत्तरं दत्वा वित्तमन्त्री निर्मलासीतारामन: अवोचत् यत् मोदीप्रशासनस्य उद्देश्यं करसंरचनाया: सरलीकरणेन देशे विकास: भविष्यति, वृत्यवसरा: अपि भविष्यन्ति।

**राष्ट्रपतिः – द्रौपदी मुर्मूः**

राष्ट्रपतिः द्रौपदी मुर्मूः, गवर्नर् जनरल् डेम् सिण्डी किरो इत्यस्याः निमन्त्रण-पुरस्सरम्, गतदिने अपराह्ने द्विदिवसीय-यात्रार्थं न्यूज़ीलैण्ड्देशस्य आक्लैण्ड्-नगरम् आगतवती। सा गवर्नर् जनरल् डेम् सिण्डी किरो इत्यनया सह, प्रधानमन्त्रिणा क्रिस्टोफर लक्सन् इत्यनेन सह द्विपक्षीयसमागमं अकरोत्। राष्ट्रपतिः वेलिंग्टननगरे अन्ताराष्ट्रिय-शिक्षासम्मेलनम् अपि सम्बोधयिष्यति, यत्र भारतं विशिष्टातिथिरूपेण वर्तते। सा ऑक्लैण्ड्-नगरे सामुदायिक-स्वागत-समारोहे भारतीय-प्रवासी-भारत-मित्रैः सह अपि संवादं करिष्यति। एषा यात्रा बहूनां क्षेत्रेषु वर्धमानसम्बन्धानां कृते अधिकं गतिं दास्यति इत्यपेक्षा वर्तते।

**निर्वाचन/आयोग:**

निर्वाचनायोगेन नवराज्यानां द्वादश रिक्त राज्यसभासनानां निर्वाचनकार्यक्रमस्य घोषणा विहिता। अधिसूचना च अगस्तमासस्य चतुर्दशदिनाङ्के प्रकाशिता भविष्यति। प्रत्याशिन: अगस्तमासस्य एकविंशति: दिनाङ्कं यावत् नामाङ्कनं कर्तुं अर्हन्ति। नामाङ्कनपत्राणां परीक्षणं अगस्तमासस्य द्वाविंशे भविता। अवधेयं यत् निर्वाचनं सितंबरमासस्य तृतीयेदिनाङ्के भविष्यति।

निर्वाचनायोग: सोम-मंगवासरयो: आगामिविधासभानिर्वाचनस्य सज्जताया: समीक्षां विधास्यति। हरियाणाराज्यस्य मुख्य निर्वाचनाधिकारिणा पङ्कज अग्रवालेन समुदीरितं यत् भारत इलेक्ट्रॉनिक्स लिमिटेड इत्यस्य अभियन्तार: राज्यस्य सर्वेषु अपि द्वाविंशति: जनपदेषु ई.वी.एम. इत्यस्य प्रथमस्तरीय निरीक्षणं कुर्वन्ति।

**लोकसभा**

क्रीडामन्त्री मनसुख् माण्डविया अवदत् यत् भारतीय-ओलिम्पिक्-सङ्घः विश्व-मल्लयुद्ध-सङ्घस्य समक्षं, प्यारिस्-ओलिम्पिक्-क्रीडायां मल्लयुद्धे विनेश् फोगाट्-इत्यस्याः अयोग्यतायाः विरुद्धं विरोध-प्रत्यावेदनम् अकरोत्। डा. माण्डविया अद्य लोकसभायां अवदत् यत् केन्द्रम्, विनेश इत्यस्यै सर्वं साहाय्यं प्रददाति इति। सः उक्तवान् यत्, अस्मिन् विषये प्रधानमन्त्रिणा

नरेन्द्रमोदिना, भारतीय-ओलिम्पिक्-सङ्घस्य अध्यक्षया पी. टी. उषा इत्यनया सह वार्तालापः कृतः। डा. माण्डविया अवदत् यत्, अस्मिन् विषये सर्वाः सम्भावनाः अन्वेष्टुं भारतीय-ओलिम्पिक्-सङ्घः आदिष्टः अस्ति। क्रीडामन्त्री अवदत् यत् विनेश् फोगाट् इत्येषा पंचाशत् कि. ग्रा. भारवर्गे क्रीडति स्म, तस्याः भारः विहितसीमायाः अपेक्षया शतम्, ग्राम्-मितः अधिकः जातः।

**प्रधानमन्त्री-ओलिम्पिक्**

ह्यः पेरिस-ओलम्पिक-क्रीडायां महिला-मल्लयुद्धस्य अन्तिम-क्रीडायाः कृते अयोग्यतां प्राप्तायाः विनेश-फोगाट्-इत्यस्याः कृते प्रधानमन्त्री नरेन्द्रमोदी सान्त्वनाम् अयच्छत्। सामाजिक-संजालीय-सन्देशे प्रधानमन्त्री मोदी उक्तवान् यत् एषा दुःखदायिका वार्ता हृदयविद्राविका वर्तते। सः अवदत् यत् मल्लयुद्धे फोगाट् तदृशी एका विजेत्री अस्ति या भारतस्य गौरवः, अथ, प्रत्येकस्य भारतीयस्य कृते प्रेरणादायिका अपि वर्तते ।

**॥इति वार्ता:॥**